# ||SURASHTRIYA||

**Bi-Annual National Level, Registered, Recognized, Refereed & Peer Reviewe**
**Research Journal**
**[Sanskrit, Hindi, Gujarati, & English Subjects]**

॥ तमसो मा ज्योतिर्गमय ॥
प्रस्थान फाउन्डेशन

## Chief Editor

**Dr. Raja N. Kathad**
Associate Professor
Department Of Sanskrit
Saurashtra University
Rajkot – 360005
(Gujarat – India)

## Editors

Prof. Dinesh M. Gohel
Dr.Bhartkumar N. Jadav
Dr.Kantilal G. Kathad
Gauri K.Makwana
Chandulal V.Parmar [ U.G.C-RGNF-SRF]

## Publisher

Prasthan Foundation – Junagadh – Gujarat
Regi. No- E/4532/ Jun/ Date-19/8/2000

Scanned with CamScanner

# वेणिसंहारस्य राक्षसदम्पतौ सूचितार्थः

डॉ.डायालाल एम. मोकरिया*

*सारांश :*

*साहित्यं समाजस्य दर्पणस्ति । कविः प्रत्यक्षरूपेण अथवा परोक्षरूपेण समाजं चित्रयति । तेन समाजस्य ज्ञानम् अपि प्राप्यते एवं मार्गदर्शनम् अपि क्रियते । वेणिसंहारे अपि कविः भट्टनारायणः वैविध्यपूर्णानि चरित्राणि निरूपित्वा समाजं प्रस्तुतं करोति । वेणिसंहारस्य तृतीये अङ्के प्रवेशके राक्षसदम्पतेः संवादः वर्तते । तस्मिन् कविना सज्जनदुर्जनयोः भेदः सूचितः । नाटकीयकार्यसिद्धिना सह अत्र राक्षसचरित्रस्य कल्पना अपि कृता । एतस्मिन् शोधपत्रे सः मौलिकः अर्थः प्रस्तुतः वर्तते ।*

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिवृतये कान्तासम्मिततयोपदेशयुजे ।।[१]

आचार्यः मम्मटः काव्यस्य प्रयोजनानि दर्शयित्वा कथयति । यत् काव्यं मनुष्याय व्यवहारज्ञानं, सद्यः परनिवृत्ति, उपदेशमित्यादि ददाति । महाकविः व्यासः, महर्षिः वाल्मीकिः, कालिदास, भासः, भवभूतिः, भट्टनारायणः, भारविः, बाणः, हर्षः इत्यादयः कवयः काव्यस्य निरूपणं कृत्वा मानवसमाजस्य महत् उपकारः कृतवन्तः । काव्यं मनुष्याय जीवनस्य कलां शिक्षयति । जीवने शक्तिं सञ्चारयति । तस्य रसास्वादेन मनुष्यः स्वजीवने चेतनां प्राप्नोति । यथा वृष्ट्या वृक्षा विरुधाः, वनस्पतयः, च नवजीवनं प्राप्नुवन्ति तथैव काव्यरसः मनुष्यस्य चित्तं प्रसादयति ।

अत्रापि नाटयकारभट्टनारायणस्य वेणिसंहारस्य पात्रनिरूपणकलाम् आस्वाद्य तृतीयाङ्कस्य अर्थघटनं कृतम् वर्तते । तत्रनिरूपितराक्षसदम्पतेः संवादमाध्यमेन कवेः सूचितार्थः विचारणीयः वर्तते ।

वेणीसंहारस्य तृतीयाङ्कस्य प्रारम्भे प्रवेशकः वर्तते । नाट्यकाराः प्रवेशकेन रङ्गमञ्चे अप्रस्तुत–सन्दर्भाणां निर्देशं कुर्वन्ति । ते प्रसङ्गा प्रेक्षकेभ्यः भावकेभ्यः च ज्ञापनीयाः भवन्ति । तस्मिन् कथानकसम्बन्धिताः भूतकालस्य अथवा भविष्यकालस्य प्रसङ्गाः निम्नपात्रैः वर्णिताः भवन्ति । तस्मिन् कथानकस्य अनुसन्धानं भवति ।[२] अत्रापि जयद्रथ–घटोत्कच–अभिमन्यु–भवदत्त–द्रुपद–भूरिश्रवा–सोमदत्त–बल्हीक–द्रोण–प्रभूतिनां वधः अभवत् तस्य सूचनं राक्षसदम्पतेः संवादे दृश्यते । एतस्मिन् समराङ्गणे अनेकैः मनुष्यैः सह गजनां, अश्वानां वा अनेकपशुनाम् अपि संहारः सञ्जातः । तस्मात् सर्वत्र रूधिरमासादिनां दर्शनं भवति । बीभत्सरसः न प्रत्यक्षीकृतः । किन्तु कविना कथानके अनुसन्धानम् कृतम् । राक्षसराक्षसीरूपनिम्नपात्राभ्यां कविना कथावस्तोः गतिः साधिता ।

वेणिसंहारनाटकं महाभारताधारितं वर्तते । तदपि कविना तृतीयाङ्के राक्षसदम्पतेः प्रसङ्गः मौलिकतया निरूपितः । महाभारतस्य युद्धं प्रचलति । तस्मिन् अनेकसैनिकाः मृताः । तेषां स्थितेः वर्णनं राक्षसदम्पतीः करोति ।

राक्षसस्य नाम रूधिरप्रियः एवं राक्षस्याः नाम वसागन्धाः वर्तते । अत्र नाम्नि अपि सूचितार्थः ज्ञायते । समाजे केचन् जनाः राक्षसवद् आचरन्ति । परपीडनं तेषां स्वभावः भवति । साहित्यकाराः तेषां

* असि.प्रोफेसर, अनुस्नातक भवन,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावल,
जि. गीर–सोमनाथ,



Scanned with CamScanner

ISSN – 2249 – 4383

कृते दुर्जनः, खलः, मूढ इत्यादयः सदृशान् शब्दान् प्रयुजयन्ति । अस्माकं समाजे यः जनः अन्येभ्यः पीडां ददाति तस्य कृते 'रूधिरं पीबति' इति शब्दप्रयोगः प्रचलतिः वर्तते । अत्र राक्षसस्य नामकरणं सार्थकं भवति यतोहि अत्रापि राक्षसः मृतजनान् दृष्ट्वा आनन्दितः भवति । वसागन्धा इति नाम्नि अपि अर्थसार्थक्यं वर्तते । यस्यां अगन्धः एव वसति, दुर्गन्धः एव दृश्यते, दुर्विचाराणाम् एव स्थानं वर्तते सा वसागन्धा अस्ति । सा अपि यस्मिन् मनुष्यवधः भवति तादृशं युद्धं वर्षशतं भवेत् तादृशीं इच्छां करोति ।[3] अत्र कविः मनुष्यस्य राक्षसीकृत्यस्य पात्ररूपेण आलेखनं करोति ।

राक्षसाः मृतजीवानां रूधिरं पिबन्ति ।[4] अर्थात् ये मृताः सन्ति, निर्जीवाः सन्ति, येषु चेतना नास्ति, तेषां रूधिरं राक्षसाः पिबन्ति । अत्र एतादृशः सूचितार्थः प्राप्यते यत् यः सचेतनः नास्ति, जागरूकः नास्ति तेषां राक्षसवृत्तियुक्ताः जनाः पीडां ददति किन्तु जागरूकानां विदूषां रूधिरं न पिबन्ति । ते गजाश्वसदृशाणांशक्तिमन्तानां पशूनाम् अपि रूधिरपानं कुर्वन्ति अर्थात् ये शक्तिसम्पन्नाः सन्ति किन्तु पशुवत् जडाः वर्तन्ते तेषाम् अपि रूधिरपाने ते समर्थाः सन्ति ।

राक्षसाणां कृते अपि एवं भयप्रदस्थानम् अपि वर्तते । तत् वर्तते ब्राह्मणः अर्थात् शिक्षकः, विद्वान् । यदि मृत्युः भवति तदपि तस्य रूधिरं ते न पिबन्ति द्रौणाचार्यस्य शिरच्छेदः भवति तदा वसागन्धा राक्षसी तस्य रूधिरपानं कर्तुम् इच्छति किन्तु राक्षसः रूधिरप्रियः वारयति । यतोहि ब्राह्मणस्य रूधिरं कण्ठं दाहयति ।[5] अत्रापि सूच्यते यत् ज्ञानीजनानां समक्षः राक्षसाः प्रभवितुं समर्थाः न सन्ति । कदाचित् ते निष्क्रियाः दृश्यन्ते तदपि तेषां समीपं गन्तुं राक्षासाः साहसं न कुर्वन्ति । अत्र शिक्षकस्य अपि परोक्षरूपेणगौरवं प्रदर्शितम् । न केवलं तादृशमेव, तस्य पुत्रात् अपि राक्षसः बिभेति ।[6] ज्ञानिनः सूतः अपि समर्थः भवति । अतः राक्षसवृत्तियुक्ताः जनाः तस्य समक्षं न गच्छन्ति । किन्तु स्वस्य स्थानम् अपि त्यक्त्वा ततः निर्गच्छन्ति ।

राक्षसाः कदा समर्थाः भवन्ति, कुत्र समर्थाः भवन्ति तदर्थम् अपि कविनां सूचनं कृतम् । राक्षसाः समराङ्गणे रूधिरपानं कुर्वन्ति ।[7] अर्थात् मनुष्यः प्रायः मनोयुद्धं करोति एव । मनसि अनेक द्वन्द्वाः आगच्छन्ति । मनुष्यः चिन्तितः भवति । तस्य चित्ते निर्णयात्मिका बुद्धिः न भवति, ज्ञानं न भवति तदा तादृशद्वन्द्वयुक्तमनुष्यस्य राक्षसाः रूधिरं पिबन्ति अर्थात् तादृशजनं ते पीड्यन्ति । चित्ते मानसिकाः द्वन्द्वः वर्तते सः एव समराङ्गणः अस्ति । तस्मिन् राक्षससदृशजनाः सफला भवन्ति । ज्ञानीपुरुषस्य चित्ते द्वन्द्वेषु विवेकः वर्तते अर्थात् ते द्वन्द्वातीतः भवति अतः तान् राक्षसाः न पीड्यन्ति । भगवद्गीतायाम् अपि भगवान् कथयति –

> द्वन्द्वैर्विमुक्ता सुखदुःखसञ्ज्ञै
> गच्छन्त्यमुढा पदमव्ययं तत् ।।[8]

अर्थात् द्वन्द्वरहितः जनः, ज्ञानिजनः सुखम् अनुभवति । तेषां समीपे अनिष्टाः न प्रभवन्ति ।

राक्षसाः तत्कालमृतानां अधिकाम् इच्छां कुर्वन्ति ।[9] यः जनः निर्बलः भवति, यस्य शक्तिः क्षीणा भवति तादृशं जनं राक्षसवृत्तियुक्ताः साक्षात् एव ग्रहणं कृत्वा पीड्यन्ति ।

राक्षसाणां दृष्टिः नकारात्मकी स्वार्थपूर्णा च भवति । वेणिसंहारस्य तृतीयाङ्कस्य प्रारम्भे एव राक्षसी रूधिरं मासम् इच्छति एवं युद्ध वर्षशतं यावत् भवेत् तादृशीम् इच्छां करोति ।[10] अत्र जनसंहारम् इच्छन्त्याः राक्षस्याः पात्रेण राक्षसीवृत्तियुजनस्य नकारत्मकी बुद्धिः एवं स्वार्थपूर्णा वृत्तिः सूचिता वर्तते ।

इत्थं, साहित्यं मनुष्यजीवने सन्देशं ददति । कविः स्वप्रतिभया तस्य निरूपणं करोति एवं भावकः आस्वादं करोति । अत्र साहित्यस्य आस्वादेन सह

ISSN – 2249 – 4383



मार्गदर्शनम् अपि कविन विशिष्ट्या शैल्या कृतम् वर्तते । नूनं एषः प्रसङ्गः सूच्यः वर्तते ।

## सन्दर्भ :

१. काव्यप्रकाशः १/२

२. वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ।।
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः ।
शुद्धः स्यात्स तु सङ्कीर्णो नीचमध्यमकल्पितः ।।
प्रवेशकोऽनुदातोक्त्या नीचपात्रप्रयोजितः ।
अङ्क द्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ।।साहित्यदर्पणम्, ६/५५,५६,५७

३. हतमानुषमांसभारके कुम्भसहस्रवसाभिः संचिते ।
अनिशं च पिबाभिः शोणितं वर्ष शतं समरो भवतु ।।वेणिसंहराम्–३/१

४. तत्रैव

५. राक्षसी–(सहर्षम्) रूधिरप्रिय, एहि । गत्वा द्रोणस्य रूधिरं पिबावः ।
राक्षसी–(सभयम्)वसागन्धे, ब्राह्मणशोणितं खल्वेतद् । गलं दहद्दहत्प्रविशति । तत्किमेतेन ।
तत्रैव, अङ्क–३, पृ.१०४

६. एष खल्वश्वत्थामा आकृष्टासिपत्र इत एवागच्छति । कदाचिद् द्रुपदसुतरोषेणाऽऽवामपि व्यापादयिष्यति । तदेहि ।अतिक्रमावः । तत्रैव

७. यदि सिन्धुराजवधदिवस इव दिवसे-दिवसे समरकर्म प्रतिपाद्यतेऽर्जुनस्ततः पर्याप्तभरितकोष्ठागारं मांसशोणितैर्मे गृहं भविष्यति । तत्रैव, पृ.९८

८. श्रीमद्भगवद्गीता, १५–५

९. प्रत्यग्रहतानां मांसं यद्युष्णं रूधिरं च लभ्येत ।
तदेष मम परिश्रमः क्षणमात्रमेव लघु नश्येत् । – वेणिसंहारम्, ३/२

१०. तत्रैव, ३/१

## सन्दर्भग्रन्था :

१. वेणिसंहारनाटकम्, मोतीलाल बनारसीदास, दिल्ली, वाराणसी, १९७६

२. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर

३. काव्यप्रकाशः, परिमल पब्लिकेशन्स, दिल्ली, २०१२

४. साहित्यदर्पणम्, नाग पब्लिशर्स, दिल्ली,२०००

Scanned with CamScanner